## RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. SECOND SEMESTER EXAMINATION, MAY 2017**
**FIRST YEAR [BATCH 2016-19]**
**SANSKRIT (General)**
**Paper : II**

Date : 22/05/2017
Time : 11 am – 2 pm
Full Marks : 75

1. **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×10]
   क) स्वप्नवासवदत्तनाटकस्य नामकरणस्य सार्थक्यं प्रतिपादनीयम्।
   ख) पद्मावती–वासवदत्तयोः चरितपार्थक्यं निरूप्यताम्।

2. वङ्गभाषया आङ्गलभाषया वा पद्य**स्यैकस्य** अनुवादः करणीयः। [1×5]
   क) नैवेदानीं दुःखिताश्चक्रवाका
   नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।
   धन्या सा स्त्री यां तथा वेत्ति भर्ता
   भर्तृस्नेहात् सा हि दग्धाप्यदग्धा।।
   ख) भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिताः
   पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम्।
   यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं
   तीर्णा चापि बलैर्नदी त्रिपथगा वत्साश्च हस्ते तव।।

3. सप्रसङ्गं व्याख्यायतां पद्य**मेकम्**। [1×6]
   क) गुणानां वा विशालानां सत्काराणां च नित्यशः।
   कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः।।
   ख) सुखमर्थो भवेद्दातुं सुखं प्राणाः सुखं तपः।
   सुखमन्यद् भवेत्सर्वं दुःखं न्यासस्य रक्षणम्।।

4. प्रश्न**द्वयस्य** उत्तरं लेख्यम्। [2×2]
   क) वासवदत्तायाः पित्रोः नाम किम्?
   ख) कौतुकमालिकारचनाकाले वासवदत्ता किम् औषधमधिकतया गृहीतवती? कस्मात् हेतोः?
   ग) उदयनस्य श्यालाः के आसन्?
   घ) भासेन विरचितस्य दृश्यकाव्यचतुष्कस्य नामानि लेख्यानि (स्वप्ननाटकं विहाय)।

5. **एकस्यै**व प्रश्नस्योत्तरं लेख्यम्। [1×10]
   क) कालिदासमनुसृत्य पत्न्या सह दिलीपस्य वशिष्ठाश्रमगमनं वर्णनीयम्।
   ख) रघुवंशकाव्यस्य प्रथमसर्गमनुसृत्य राज्ञो दिलीपस्य माहात्म्यं वर्णयत।

6. वङ्गभाषया आङ्गलभाषया वा पद्य**स्यैकस्य** अनुवादः कार्यः। [1×6]
   क) दुदोह गां स यज्ञाय शस्याय मघवा दिवम्।
   सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्।।
   ख) सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम्।
   भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत्।।

7. पद्य**मेकं** सप्रसङ्गं व्याख्येयम्। [1×8]

क) लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्।
सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे।।

ख) तस्यं संवृतमन्त्रस्य गूढाकारेङ्गितस्य च।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव।।

8. प्रश्न**त्रयस्य** उत्तरं लेख्यम्। [3×2]

क) किं नाम हैयङ्गवीनम्?

ख) कानि तावद् राज्यस्य सप्त अङ्गानि?

ग) कास्तावत् षड् ईतयः?

घ) क आसीत् महीक्षिताम् आद्यः?

ङ) '<u>काप्यभिख्या</u> तयोरासीत्...' इत्यत्र निम्नरेखाङ्कितांशस्यार्थः कः?

9. **पञ्चा**नामेव पदानां सव्यासवाक्यं समासनामानि लेख्यानि। [5×2]

क) वसुन्धरा

ख) अध्यब्धि

ग) नीलोत्पलः

घ) निःशुल्कम्

ङ) रामकृष्णः

च) जलदगम्भीरः

छ) मित्रावरुणौ

ज) कारणान्तरम्

10. स्वेच्छया **षण्णा**मेव परिणतरूपाणि लेख्यानि। [6×1]

क) दशरथ + अण्

ख) लक्ष्मी + मतुप्

ग) √पच् + क्त

घ) √यज् + तुमुन्

ङ) √वृ + अनीयर्

च) √धा + शानच्

छ) √स्मृ + णमुल्

ज) हिरण्य + मयट्

झ) कुल + ख

ञ) स्मृति + अण्

11. वाक्यरचनया यस्य कस्यापि युगल**द्वयस्य** अर्थपार्थक्यं प्रदर्शनीयम्। [2×2]

क) उदकीयति, उदन्यति

ख) वर्णी, वर्णवान्

ग) उत्तिष्ठति, उत्तिष्ठते

घ) सुगन्धः, सुगन्धि

———— × ————